# CAMBRIAN PUBLIC SCHOOL

**KANKE ROAD, RANCHI**

**Revision Assignment -1**

**Subject: Sanskrit** **Class: VIII**

**1.** अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत। (निम्नलिखित गद्यांश को पढ़कर प्रश्नों के उत्तर लिखिए।)

संस्कृत साहित्यम् अति समृद्ध विशालञ्च साहित्यमस्ति । संस्कृते अनेके विलक्षण-प्रतिभासम्पन्नाः साहित्यकाराः अभवन्। तेषु कविः कालिदासः सर्वश्रेष्ठः कविः कथ्यते। न केवलं भारते अपितु सम्पूर्ण जगति अस्य महान् गौरवः प्रसिद्धिः च। पाश्चात्यविद्वांसः तु कालिदासस्य तुलना 'शेक्सपीयर' कविना सह कुर्वन्ति।एका किंवदन्ती प्रसिद्धा अस्ति यत् 'एषः पूर्व महामूर्खः आसीत्।पण्डिताः छलेन तस्य विवाहं राजकुमार्या विद्योत्तमया सहअकारयन्।

I. एकपदेन उत्तरत l (एक पद में उत्तर दीजिए l)

i) संस्कृत-साहित्ये कः सर्वश्रेष्ठः कविः कथ्यते?

ii) विद्वांसः विद्योत्तमायाः विवाहं केन सह अकारयन् ?

II. पूर्णवाक्येन उत्तरत l (पूरे वाक्य में उत्तर दीजिएl)

i) कालिदासस्य विषये का किंवदन्ती प्रसिद्धा अस्ति?

III. यथानिर्देशम् उत्तरत (निर्देश के अनुसार उत्तर दीजिए l)

i) 'एषः पूर्व महामूर्खः आसीत्' अत्र 'एषः' पदं कस्मै प्रयुक्तम्?

ii) 'कालिदासस्य' पदे का विभक्तिः प्रयुक्ता?

**2.** क्रोधितः तृतीयः अकथयत्- रे मूर्ख ! अहं विद्यायाः विफलतां न करिष्यामि। अहं तु एतस्मिन् प्राणान् सञ्चारयामि। सुबुद्धिः अवदत् - क्षणं प्रतीक्षस्व, यावदहं वृक्षमारोहामि। इत्युक्त्वा सः वृक्षमारोहत्। तदा तृतीयेन ब्राह्मणेन तस्मिन् यथा प्राणाः सञ्चारिताः तथैव सिंहः जीवितः भूत्वा तान ब्राह्मणान् आक्रम्य तेषां नाशमकरोत्। तत्पश्चात् सुबुद्धिः वृक्षादवतीर्य स्वगृहं गतः।

I. एकपदेन उत्तरत l (एक पद में उत्तर दीजिएl)

i) तृतीयः सिंहे किं सञ्चारयितुम् इच्छति स्म?

ii) सुबुद्धिः वृक्षादवतीर्य कुत्र गतः?

II. पूर्णवाक्येन उत्तरत l (पूरे वाक्य में उत्तर दीजिएl)

i) सिंहः जीवितः भूत्वा किम् अकरोत् ?

ii) सुबुद्धिः किम् अवदत् ?

III. यथानिर्देशम् उत्तरत (निर्देश के अनुसार उत्तर दीजिए l)

i) 'वृक्षमारोहत्' पदे सन्धिः संयोगः वा?

ii) 'सफलताम्' पदस्य विपरीतार्थकं पदम् अनुच्छेदात् चित्वा लिखत।

iii) 'करिष्यामि' इति क्रियापदस्य किं कर्तृपदम् अनुच्छेदे प्रयुक्तम्?

iv) इति ............ सः वृक्षमारोहत् ।.(रिक्तस्थानपूर्ति कुरुत)

**3.** अधोलिखितं पद्यांशं पठित्वा प्रश्नान् उत्तरत-()

**नाग्निना शाम्यति ह्यग्निः क्रोधः क्रोधेन नैव च।**

**परस्पर विरोधो हि परस्पर-विनाशकृत् ।।**

I. एकपदेन उत्तरत l (एक पद में उत्तर दीजिए)

i) अग्निः केन न शाम्यति ?

ii) क्रोधेन कः न शाम्यति ?

II. पूर्णवाक्येन उत्तरत l (पूरे वाक्य में उत्तर दीजिए l)

i) परस्पर विरोधः किं करोति ?

III. यथानिर्देशम् उत्तरत l (निर्देश के अनुसार उत्तर दीजिए l)

i) 'नाग्निना शाम्यति अग्निः' अत्र किं कर्तृपदम्?

(अ) शाम्यति (ब) अग्निना (स) अग्निः

ii) 'नैव' पदस्य सन्धिच्छेदः अस्ति - न +……..

**4.** **खलः करोति दौरात्म्यं मलः पतति साधुषु ।**

**रावणेन हृता सीता बन्धनं तु महोदधे ।।**

I. एकपदेन उत्तरत- (एक पद में उत्तर दीजिए)

i) दौरात्म्यं कः करोति ?

ii) सीता केन हृता?

II. पूर्णवाक्येन उत्तरत - (पूरे वाक्य में उत्तर दीजिए)

i) मलः केषु पतति?

III. यथानिर्देशम् उत्तरत (निर्देश के अनुसार उत्तर दीजिए l)

i) ‘साधुषु’ इति पदे का विभक्तिः अस्ति?

ii) ‘रावणेन’ इति पदे का विभक्तिः अस्ति?

**5.** उचितपदैः अन्वयं पूरयत-()

(क) आशायाः खलु ये दासास्ते दासाः सर्वदेहिनाम्। आशा दासीकृता येन तस्य दासायते जगत् ।।

अन्वयः -ये खलु .1.......दासाः, ते . 2.......दासाः (भवन्ति)। येन 3..........दासीकृता, 4...........तस्य दासायते।

**मञ्जूषा-** ( जगत् ,आशा ,सर्वदेहिनाम् ,आशायाः )

(ख) खलः करोति दौरात्म्यं मलः पतति साधुषु। रावणेन हृता सीता बन्धनं तु महोदधे ।।

अन्वयः - खलः 1...........करोति, साधुषु मलः. 2........ । सीता 3.............हृता, महोदधे तु 4............ (अभवत्)।

**मञ्जूषा-** ( पतति ,रावणेन, बन्धनं, दौरात्म्यं )

**6.** रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत। (रेखांकित पदों के आधार पर प्रश्न निर्माण कीजिए ।)

i) संस्कृते अनेके विलक्षण-प्रतिभासम्पन्नाः **साहित्यकाराः** अभवन्।

ii) **कालिदासस्य** तुलना 'शेक्सपीयर' कविना सह क्रियते।

iii) विद्वांसः ताम् **शास्त्रार्थे** जेतुं नाशक्नुवन्।

iv) **रात्रौ** उष्ट्रं गच्छन्तं दृष्ट्वा कालिदासः हर्षेण अवदत्।

v) सः **त्रीणि** काव्यानि अरचयत्।

vi) मेघदूतं **गीतिकाव्यानां** शिरोरत्नं मन्यते।

vii) अहम् **विद्यालयं** गत्वा ज्ञानं प्राप्तुम् इच्छामि।

viii) सा **स्वमातरं** प्रति गच्छति।

ix) सः **कक्षायाम्** उत्तीर्णः अपि न भविष्यति ।

x) **नार्यः** न केवलं विमानमपितु देशमपि चालयन्ति।

xi) मुख्यातिथिमहोदयः छात्रान् प्राशंसत्।

xii) अस्माकं हृदयानि **देशभक्तिभावनया** ओतप्रोतानि।

**7.** निम्नलिखित धातुरूप और शब्दरूप को उत्तर पुस्तिका में लिखिए एवं याद कीजिए।

- शब्दरूपाणि- देव,फल,नदी, साधु लता,अस्मद् ,तत्
- धातुरूपाणि- पठ्,गम्,भू लिख्,रक्ष्,अस् (लट्-लृट्-लङ् लकारेषु)

**********